# Pratimasashivaratryam Shivarchanopadesham

# પ્રતિમાસશિવરાત્ર્યાં શિવાર્ચનોપદેશમ્

## Document Information

Text title : Pratimasashivaratryam Shivarchanopadesham

File name : pratimAsashivarAtryAMshivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 26 | 36-60||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2024

*sanskritdocuments.org*

Pratimasashivaratryam Shivarchanopadesham

# પ્રતિમાસશિવરાત્ર્યાં શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે મહાદેવાખ્યે)

સ્કન્દ ઉવાચ ।

પ્રતિમાસં કૃષ્ણપક્ષે શિવરાત્રિં ચ સત્તમ ।
પૂજયેદવિમુક્તેશમન્યક્ષેત્રેઽપિ વા શિવમ્ ॥ ૩૬॥

માઘ્યાં કૃષ્ણચતુર્દશ્યાં પૂજયેદિન્દુશેખરમ્ ।
ચૈત્રે ત્રિણેત્રનામાનં પૂજયેત્પરમેશ્વરમ્ ॥ ૩૭॥

દ્વાદશાહક્રતુફલં લભતે સોઽચિરાન્મુને ।
વૈશાખે શિવનામાનં પૂજ્ય રાત્રૌ કુશોદકમ્ ॥ ૩૮॥

પીત્વા પુરુષમેધસ્ય ફલમષ્ટગુણં લભેત્ ।
જ્યેષ્ઠે પશુપતિં પૂજ્ય ગવાં શૃઙ્ગોદકં પિબેત્ ॥ ૩૯॥

ગવાં કોટિપ્રદાનસ્ય યત્ફલં તદવાપ્નુયાત્ ।
આષાઢે ચોગ્રનામાનં દૃષ્ટ્વા પ્રાશ્ય ચ ગોમયમ્ ॥ ૪૦॥

સૌત્રામણ્યયુતસ્યૈવ સ ફલં પ્રાપ્નુયાન્નરઃ ।
શ્રાવણે શર્વનામાનં પૂજ્ય પર્ણાનિ ભક્ષયેત્ ॥ ૪૧॥

વર્ષકોટિશતં સાગ્રં સૂર્યલોકે મહીયતે ।
માસે ભાદ્રપદેઽષ્ટમ્યાં ત્ર્યમ્બકં નામ પૂજયેત્ ॥ ૪૨॥

પ્રાશ્ય બિલ્વફલં પક્વં સત્રયાગફલં લભેત્ ।
માસે ચાશ્વયુજેઽષ્ટમ્યામીશ્વરં નામ પૂજયેત્ ॥ ૪૩॥

પૌર્ણમ્યામાશ્વયુજ્યાં ચ અશ્વિન્યર્ક્ષે પ્રદોષકે ।
અન્ધસાં રાશિભિર્લિઙ્ગં છાદયેદ્ધામમાત્રકમ્ ॥ ૪૪॥

સિક્થે સિક્થેઽશ્વમેધસ્ય ફલમાપ્નોતિ માનવઃ ।
તણ્ડુલોદકમાપીય તસ્મિન્ માસિ શિવાર્ચકઃ ॥ ૪૫॥

પૌણ્ડરીકાષ્ટકસ્યૈવં ફલં ચ સકલં ભવેત્ ।
કાર્તિકે રુદ્રનામાનં પૂજ્ય પીત્વા કુશોદકમ્ ॥ ૪૬॥

અગ્નિષ્ટોમાદિદશકં ફલં પ્રાપ્ય વિમુચ્યતે ।
માર્ગશીર્ષે મહાદેવમુગ્રનામ્ના પ્રપૂજયેત્ ॥ ૪૭॥

સ ઉક્થ્યદશકસ્યૈવ લભેત ફલમમ્બુપઃ ।
પુષ્યમાસે તુ સમ્પ્રાપ્તે યઃ કુર્યાન્નક્તભોજનમ્ ॥ ૪૮॥

શર્વાર્ચનરતો ધીમાન્ ફલમૂલેન વર્તયેત્ ।
અપ્તોર્યામાયુતફલં પ્રાપ્નોત્યેવ વિશેષતઃ ॥ ૪૯॥

માઘમાસે તુ સમ્પ્રાપ્તે યઃ કુર્યાન્નક્તભોજનમ્ ।
સ ષોડશી(શિ)શતફલં પ્રોપ્નોત્યમરપૂજિતઃ ॥ ૫૦॥

સમ્પ્રાપ્તે ફાલ્ગુને માસિ નક્તાશી શિવપૂજકઃ ।
શ્યામાકક્ષીરનીવારૈર્જિતક્રોધો જિતેન્દ્રિયઃ ॥ ૫૧॥

અત્યગ્નિષ્ટોમદશકફલમેષ સમશ્નુતે ।
સોપવાસશ્ચતુર્દશ્યાં ભવેદુભયપક્ષયોઃ ॥ ૫૨॥

શિવાય પૂર્ણિમાયાં તુ યો દદ્યાદ્ઘૃતકમ્બલમ્ ।
માઘ્યામઘાયુતૈર્મુક્તો ભવેદેવ મહામુને ॥ ૫૩॥

માસદ્વાદશકં હ્યેવં પૂજયેચ્છશિશેખરમ્ ।
પર્વાન્તે ભોજયેદ્વિપ્રાન્ શિવભક્તાન્ જિતેન્દ્રિયાન્ ॥ ૫૪॥

પાયસં મધુયુક્તં ઘૃતેન ચ પરિપ્લુતમ્ ।
ભક્ત્યા હિરણ્યવાસાંસિ ભક્તેભ્યો યો નિવેદયેત્ ॥ ૫૫॥

વર્ષમેકં ચરેદેવં નૈરન્તર્યેણ યો નરઃ ।
સર્વયજ્ઞફલં લબ્ધ્વા શિવક્ષેત્રે વિમુચ્યતે ॥ ૫૬॥

અવિમુક્તે તુ નિયતમેવં વ્રતવરં ચરેત્ ।
જિતેન્દ્રિયઃ સત્યવાદી વિત્તશાઠ્યવિવર્જિતઃ ॥ ૫૭॥

દેહાન્તે શિવસારૂપ્યં લભેત્પુણ્યફલં શ ૃણુ ।
સૂર્યકોટિપ્રતીકાશૈર્વિમાનૈઃ સાર્વગામિકૈઃ ॥ ૫૮॥

રુદ્રકન્યાસમાકીર્ણૈર્મહાવૃષભસંયુતૈઃ ।

સઙ્ગીતનૃત્તવાદ્યાદ્યૈરપ્સરોગણસેવિતૈઃ ॥ ૫૯॥

ચામરૈર્ધૂયમાનશ્ચ સ્તૂયમાનઃ સુરાસુરૈઃ ।
ગત્વા શિવપુરં દિવ્યં વસેદાભૂતસમ્પ્લવમ્ ॥ ૬૦॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં પ્રતિમાસશિવરાત્ર્યાં શિવાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । મહાદેવાખ્યઃ એકાદશમાંશઃ । અધ્યાયઃ ૨૬ । ૩૬-૬૦॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 26 . 36-60..

Notes:

Skanda સ્કન્દ outlines the procedures and merits of observing Māsika Śivarātri માસિક શિવરાત્રિ on Kr̥ṣṇa Caturdaśi કૃષ્ણ ચતુર્દશી of respective months, with mention of the Names of Śiva શિવ for respective māsa માસ (though the Names for Śrāvaṇa શ્રાવણ and Puṣya પુષ્ય are repeated, and those for Māgha માઘ and Phālguna ફાલ્ગુન seem to have not been specified). It has also been noted that Aṣṭamī અષ્ટમી and Pūrṇimā પૂર્ણિમા have been mentioned (instead of Kr̥ṣṇa Caturdaśi કૃષ્ણ ચતુર્દશી) wrt Aśvāyuja અશ્વાયુજ.

Proofread by Ruma Dewan

*Pratimasashivaratryam Shivarchanopadesham*

pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*